(751) "तुबि अदर्शने" (X-चुरादिः-1658. सक. सेट्. उभ.)

अर्दने इति केचित् । इदित्करणात् णिचः पाक्षिकत्वम् ।

'लुम्बयेत् तुम्बयेदर्दे शपि लुम्बति तुम्बति ॥' (श्लो. 139) इति देवः । 'तुपि अर्दने' इति मैत्रेयदुर्गसंमतपाठमनुसृत्य दैवश्लोके—'अर्दने तुम्पयेण्णिचि ।' (श्लो. 139) इत्यंशस्य उपपत्तिर्बोध्या ।

तुम्बकः-म्बिका, तुतुम्बयिषकः-षिका, तुम्बकः-म्बिका, तुतुम्बिषकः-षिका, तोतुम्बकः-म्बिका ; तुम्बयिता-त्री, तुतुम्बयिषिता-त्री, तुम्बिता-त्री, तुतुम्बिषिता-त्री, तोतुम्बिता-त्री ; इत्यादीनि सर्वाण्यपि रूपाणि भाषार्थककुशिधातुवत् (232) बोध्यानि । तुम्बः-तुम्बी=[अलाबूः] । गौरादिपाठात् ङीष् । [A]तुम्बितम् ।

(752) "तुभ हिंसायाम्" (I-भ्वादिः-753. सक. सेट्. आत्म.)

[B]तोभकः-भिका, तोभकः-भिका, तुतुभिषकः-तुतोभिषकः-षिका, तोतुभकः-भिका ; तोभिता-त्री, तोभयिता-त्री, तुतुभिषिता-तुतोभिषिता-त्री, तोतुभिता-त्री ; इत्यादीनि सर्वाण्यपि रूपाणि क्षुभ (316) धातुवज्ज्ञेयानि ।

(753) "तुभ हिंसायाम्" (IV-दिवादिः-1241. सक. सेट्. पर.)

तोभकः-भिका, तोभकः-भिका, तुतुभिषकः-तुतोभिषकः-षिका, तोतुभकः-भिका ; तोभिता-त्री, तोभयिता-त्री, तुतुभिषिता-तुतोभिषिता-त्री ; इत्यादीनि सर्वाण्यपि रूपाणि दैवादिकगुधधातुवत् (405) बोध्यानि । क्त्वायां तुभित्वा-तोभित्वा इति रूपद्वयं बोध्यम् ।

(754) "तुभ हिंसायाम्" (IX-क्र्यादिः-1521. सक. सेट्. पर.)

तोभकः-भिका, तोभकः-भिका, तुतुभिषकः-तुतोभिषकः-षिका, तोतुभकः-भिका ; तोभिता-त्री, तोभयिता-त्री, तुतुभिषिता-तुतोभिषिता-त्री, तोतु-

A. 'किं कुम्भ्यते सदसि लुम्बितवैभवोऽहं
बालोऽस्मि तुम्बितविरोधिभयाश्च यूयम् ।' धा. का. 3.29.

B. 'अनभ्यसन्तोभककंसजीवसंसाय पापघ्नदयं प्रतस्थे ॥' धा. का. 2. 2.